भद्रं देवदत्ताय देवदत्तस्य वा [1]भूयात्। भद्रं देवदत्ताय, भद्रं देवदत्तस्य। कुशलं देवदत्ताय, कुशलं देवदत्तस्य। निरामयं देवदत्ताय, निरामयं देवदत्तस्य। सुखं देवदत्ताय, सुखं देवदत्तस्य। शं देवदत्ताय, शं देवदत्तस्य। अर्थो देवदत्ताय, अर्थो देवदत्तस्य। प्रयोजनं देवदत्ताय, प्रयोजनं देवदत्तस्य। [2]हितं देवदत्ताय, हितं देवदत्तस्य। पथ्यं देवदत्ताय, पथ्यं देवदत्तस्य[3]। आशिषि इति किम्? आयुष्यं देवदत्तस्य तपः ॥

इति [4]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ

द्वितीयाध्यायस्य तृतीयः पादः ॥

———(:०:)———

1. भूयात् नास्ति ङ. 2. उदाहरणमिदं नास्ति फ. 3. इति इत्यधिकम् ङ. फ. 4. श्रीजयादित्यविरचितायां नास्ति इ. ग. ङ. ह, जयादित्यकाशिकायां क.